04-07-2020

संस्कृतसामान्यम्। उपशास्त्री II

अनिवार्यपत्रम् हितोपदेशे संस्कृतश्लोकव्याख्या।

"अर्थाऽऽगमो नित्यमरोगिता च, प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या, षड् जीवलोकस्य सुखानि राजन्॥"

श्लोकोऽयं महाकविना श्रीनारायणपण्डितेन विरचितस्य हितोपदेशस्य मित्रलाभप्रकरणात् उद्धृतः अस्ति। गङ्गातटे अवस्थितस्य पाटलीपुत्रनगरस्य राज्ञः सुदर्शनस्य पुत्राः मूर्खाः आसन्। तस्मात् कारणात् राजा सुदर्शनः अतीव दुःखी आसीत्। एतस्मिन् अवस्थायां एकदा राजा सुखदुःखयोः उपरि विचारम् अकरोत्। सः नृपः विचारयति— कानि कतिपयानि च सुखानि सन्ति? सः अनुभवति यत् षड् सुखानि जीवलोके सन्ति। यदि कोऽपि जनः स्वस्थः अस्ति, तस्य गृहे अर्थाभावः न वर्तते, तस्य पत्नी तस्मै हृद्या प्रियवादिनी चास्ति, पुत्राः अनुकूलाः सन्ति, तस्य जनस्य विद्या अर्थकरी (धनदा) अस्ति, तदा स जनः सुखी भवति।

शब्दार्थः → नित्यं = निर्बाधः। अर्थागमः = धनागमः। आरोगिता = शरीरसौख्यम्, स्वास्थ्यम्। प्रियवादिनी = मधुरभाषिणी। प्रिया = हृद्या। वश्यः = अनुकूलः। अर्थकरी = धनकरी। षड् = षट् संख्याकाः। जीवलोकस्य = मर्त्यलोकस्य। सुखानि = सुखावहानि, आनन्दाः। पुत्रः = आत्मजः, तनयः।

(हस्ताक्षर) 04-07-2020

डॉ० निर्मलकुमार झा, (स०प्राचार्य)।
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ।
का० सिं० द० सं० वि० वि० दरभङ्गा।

संस्कृत सामान्यम्   उपशास्त्री I   04-07-2020

अनिवार्य पत्रम्   संस्कृतानुवादम् कुरुत।   हितोपदेशाच्चारितानि।

1. बिना सुगंध के पलाशपुष्प के समान मूर्ख पुत्र शोभा नहीं पाते हैं।
निर्गन्धा किंशुकाः इव विद्याहीनाः पुत्राः न शोभन्ते।
2. सौ मूर्ख पुत्रों की अपेक्षा एक गुणवान् पुत्र श्रेष्ठ होता है।
वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।
3. दरिद्र को दिया गया दान सफल होता है।
दरिद्रे (दरिद्राय) दीयते दानं सफलं भवति।
4. अपनी आत्मा के समान जो सभी जीवों को देखता है, वह पंडित है।
आत्मवत्सर्वभूतेषु यः पश्यति, स पण्डितः।
5. गाय का दूध स्वभावतः मीठा होता है।
गवां पयः प्रकृत्या मधुरं भवति।
6. क्रियाहीनज्ञान दुर्भाग्यशालिनी स्त्री के आभूषणसदृश भारस्वरूप होता है
दुर्भगाऽऽभरणप्रायो ज्ञानं भारः क्रियां विना।
7. नदियों, शस्त्रधारियों तथा नख एवं सींगवाले पशुओं पर विश्वास नहीं करना चाहिए → नदीनां, शस्त्रपाणीनां, नखिनां, शृङ्गिणान्तथा (पशूनां) विश्वासो नैव कर्तव्यः।
8. भाग्य में लिखे को मिटाने में कोई समर्थ नहीं होता है।
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः (भवति)।
9. आपत्काल में वृद्धों के वचन ग्राह्य होते हैं।
वृद्धानां वचनम् आपत्काले ग्राह्यं भवति।
10. लोभ से क्रोध उत्पन्न होता है → लोभात् क्रोधः प्रभवति।
11. लोभ पाप का कारण होता है → लोभः पापस्य कारणम् (भवति

04-07-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य
राधा-उमाकान्त संस्कृत महावि० सुखसेना, पूर्णिया

संस्कृतसामान्यम्। उपशास्त्री II

अनिवार्यपत्रम् हितोपदेशे संस्कृतश्लोकव्याख्या ।

"अर्थाऽऽगमो नित्यमरोगिता च, प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या, षड् जीवलोकस्य सुखानि राजन्॥"

श्लोकोऽयं महाकविना श्रीनारायणपण्डितेन विरचितस्य हितोपदेशस्य मित्रलाभप्रकरणात् उद्धृतः अस्ति। गङ्गातटे अवस्थितस्य पाटलीपुत्रनगरस्य राज्ञः सुदर्शनस्य पुत्राः मूर्खाः आसन्। तस्मात् कारणात् राजा सुदर्शनः अतीव दुःखी आसीत्। एतस्मिन् अवस्थायां एकदा राजा सुखदुःखयोः उपरि विचारम् अकरोत्। सः नृपः विचारयति- कानि कतिपयानि च सुखानि सन्ति? सः अनुभवति यत् षड् सुखानि जीवलोके सन्ति। यदि कोऽपि जनः स्वस्थः अस्ति, तस्य गृहे अर्थाभावः न वर्तते, तस्य पत्नी तस्मै हृद्या प्रियवादिनी चास्ति, पुत्राः अनुकूलाः सन्ति, तस्य जनस्य विद्या अर्थकरी (धनदा) अस्ति, तदा स जनः सुखी भवति।

शब्दार्थः→ नित्यं = निर्बाधः। अर्थागमः = धनागमः। आरोगिता = शरीरसौख्यम्, स्वास्थ्यम्। प्रियवादिनी = मधुरभाषिणी। प्रिया = हृद्या। वश्यः = अनुकूलः। अर्थकरी = धनकरी। षड् = षट् संख्याकाः। जीवलोकस्य = मर्त्यलोकस्य। सुखानि = सुखावहानि, आनन्दाः। पुत्रः = आत्मजः, तनयः।

डॉ० निर्मल कुमार झा, (स० प्राचार्य)।
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ।
का० सि० द० सं० वि० वि० दरभङ्गा।

04-07-2020

साहित्यम्    शास्त्री I

शिशुपालवधम् ।    श्लोकव्याख्या ।

"सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥"

श्लोकोऽयं महाकविश्रीमाघप्रणीतस्य 'शिशुपालवध' महाकाव्यस्य द्वितीयसर्गादुद्धृतोऽस्ति । अत्र बलरामः षाड्गुण्यादिपाठमात्रं न मन्त्र इत्युक्त्वा स्वयं मन्त्रस्वरूपम् आह- सर्वकार्यशरीरेषु अङ्गस्कन्धपञ्चकं मुक्त्वा सौगतानाम् आत्मा इव महीभृताम् अन्यः मन्त्रः न अस्ति । बलरामः कथयति यद्यथा बौद्धमते सर्वेषु रूपादिस्कन्धपञ्चकं परित्यज्यान्यः आत्मा नास्ति अपितु रूपादिस्कन्धपञ्चकमेव आत्मा अस्ति, तथैव समस्तकार्येषु राज्ञां सहायादिपञ्चाङ्गातिरिक्तः अन्यः मन्त्रः नास्ति अपितु सहायादिपञ्चाङ्गाः एव मन्त्राः सन्ति ।

शब्दार्थाः व्याकरणञ्च → सर्वाणि च तानि कार्याणि सर्वकार्याणि, सर्वकार्याणि शरीराणीव सर्वकार्यशरीराणि, तेषु सर्वकार्यशरीरेषु । मुक्त्वा = हित्वा । अङ्गानि स्कन्धाः इव अङ्गस्कन्धाः, तेषां पञ्चकम् अङ्गस्कन्धपञ्चकम् । सुगतः बुद्धः भजनीयः येषां, सौगताः, तेषां सौगतानाम् = बौद्धानाम् ।
आत्मा = क्षेत्रज्ञः, पुरुषः । महीभृताम् = राज्ञाम् । अन्यः = अङ्गपञ्चातिरिक्तः । मन्त्रः = मन्त्रपदवाच्यः । नास्ति = न विद्यते ।
पञ्चस्कन्धाः → रूप-वेदना-विज्ञान-संज्ञा-संस्काराः ।
पञ्चाङ्गानि → सहायाः, साधनोपायाः, देश-कालविभागः, विपत्तेः प्रतिकारः, कार्यसिद्धिः ।

अलङ्कारः - उपमा ।
छन्दः - अनुष्टुप् ।

04-07-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।